# शोधायन

(मानविकी, समाज विज्ञान, वाणिज्य की अन्तर्राष्ट्रीय सन्दर्भित शोध पत्रिका)


वर्ष : 10
अंक : 33
जनवरी - मार्च 2021

GREGN. No. 10986/2012-CO/C
ISSN 2249 - 7536 Shodhayan
MPHIN 32060/2015
Refrd. & UGC apprvd.
Peer Reviewed Research Journal


# Shodhayan

(An International Quarterly Multi-disciplinary UGC approved Research Journal)

International Overview

Vol. 33, Year - 10, January - March 2021

# अनुक्रमणिका


| क्र. | विषय विवरण | लेखक | पृष्ठ संख्या |
|---|---|---|---|
| | **हिन्दी साहित्य -** | | |
| 1. | आचार्य द्विवेदी जी का महावीरत्व | डॉ. प्रणव शास्त्री | 01 - 02 |
| 2. | डॉ. दामोदर खड़से के उपन्यास '' काला सूरज '' में चरित्रिक- सृष्टि | डॉ. प्रतिमा रामशरण बैसवारा | 03 - 06 |
| 3. | सन् 1857 के स्वाधीनता संग्राम में प्रयुक्त क्रांतिकारियों की देशी तोपें | डॉ. प्रमोद बल्लभ गोस्वामी | 07 - 11 |
| 4. | गिरिराज किशोर के कथा साहित्य में सांस्कृतिक मूल्यों का चित्रण | निधी अग्रवाल | 12 - 15 |
| 5. | मीडिया और हमारा समाज | नीतू यादव | 16 - 18 |
| 6. | हिन्दी के सशक्तिकरण में दृश्य एवं श्रव्य माध्यमों का अवदान | डॉ. लाल बहादुर सिंह | 19 - 21 |
| | **संस्कृत -** | | |
| 7. | नैषधमहाकाव्ये सौन्दर्यत्वम् | डॉ. सुकदेव वाजपेयी | 22 - 24 |
| 8. | महाकवि कालिदासस्य रूपकेषु सौन्दर्यप्रसाधनम् | डॉ. किरण आर्या | 25 - 28 |
| 9. | स्कन्दपुराण में योग दर्शन का स्वरूप | श्रीमती भारती माहेश्वरी | 29 - 32 |
| | **वाणिज्य एवं अर्थशास्त्र -** | | |
| 10. | मध्यप्रदेश में महिला पुलिस की पद स्थिति का अध्ययन | डॉ. पी.के. बंसल<br>डॉ. ज्योति राजौरिया | 33 - 41 |
| 11. | जेम प्रोक्योरमेंट - एक अनूठी वाणिज्यिक पद्धति | डॉ. किरण निम्बालकर<br>डॉ. विजय पाण्डेय | 42 - 43 |
| | **कला व संगीत -** | | |
| 12. | जयपुर घराना : एक ऐतिहासिक विहंगावलोकन | डॉ. साधना देशमुख मोहिते | 44 - 47 |
| 13. | पंजाब घराने की परम्परागत गतें एवं उनके वर्तमान स्वरूप का अध्ययन | दामिनी वर्मा | 48 - 53 |
| 14. | तबला वादन शैली के युग प्रवर्तक - उस्ताद अहमद जान थिरकवा | वैशाली | 54 - 58 |

# महाकवि कालिदासस्य रूपकेषु सौन्दर्यप्रसाधनम्

*डॉ. किरण आर्या

कविकुलशिरोमणेः कालिदासस्य काव्येषु यत्र नीतेः धर्मस्य, सनातनमर्यादीनां च हृदयग्राहि प्रतिपादनमस्ति, समग्र सांस्कृतिक चेतनाभिव्यक्तिः विद्यते तत्रैव कलासंस्कृतिरपि भूयसी दृश्यते। कालिदासस्य काव्यग्रन्थेषु–ऋतुसंहार–मेघदूत–कुमार सम्भव–रघुवंशेषु नाट्यग्रन्थेषु–मालविकाग्निमित्र– विक्रमोर्वशीय– अभिज्ञान शाकुन्तलेषु च कृतिषु न केवलं कला संस्कृतिः अपितु सौन्दर्यप्रसाधनवर्णनमपि वयं यत्र तत्रावलोकितुं शक्नुमः। स्वभावतया कालिदासः सौन्दर्यप्रशंसकः विद्यते, तथाहि–किमिव हि मधुराणां मण्डनं नाकृतीनाम् इत्युक्तिः अभिज्ञानशाकुन्तलीया सहसा वचसि आयात्येव। सौन्दर्यस्य कृते मानवः यदपि कर्त्तु वाञ्छति तत् करोति, तदर्थं खलु विभिन्नालंकरणानामपि साहाय्यं गृह्णाति। प्राच्यकालादेव मानवः निसकायमपि भूषयितुं पक्षीणां पक्षम् पुष्पपत्राणि, सुगित्यादि धारयन् दृश्यते अपि च पुष्पाणां वर्णेनापि वस्तूनि रंगयन् दृश्यते। तस्मात् मनुजानां स्वभावः कलात्मकपक्षं प्रति सहसा आकृष्टोऽभवत्। एतदेव सौन्दर्यं महाकविकालिदासेनापि स्वीयेषु काव्येषु पात्राणां, नायक–नायिकानां वर्णनेन वर्णित–विद्यते। कालिदासस्य रूपकेषु वयं पश्यामः यत् अभिज्ञानशाकुन्तले तपोधनप्रधाना संस्कृतिः विद्यते, मालविकाग्निमित्रे च राजजनविषयिका संस्कृतिः, अपि च विक्रमोर्वशीये पृथिव्यन्तरिक्षयोः स्थितं वातावरणं विद्यते। दृष्ट्यानया रूपकेषु सौन्दर्यप्रसाधनविषयोऽपि वैविध्येन दरीदृश्यते। पुनरपि ''प्रकृतिकविः कालिदासः'' कवेः दृष्ट्या जडोऽपि जीवायते अतः इयं सौन्दर्यचेतनासर्वव्यापिनी। धूमज्योतिः सलिलमरुतां सन्निपातः मेघोऽपि एतादृश्याः सौन्दर्यचेतनाया अधिकारी। तथैव स्फुटचन्द्रतारका विभावरी। संचारिणी दीपशिखा तस्याः चेतनायाः साक्षिस्वरूपिणी।

आनन्दवर्धनेन ध्वन्यालोके यत् प्रस्तुतम्–

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति**
**वाणीषु महाकवीनाम्।**
**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति**
**लावण्यमिवाङ्गनासु।।**

काव्ये सन्निहिता कविना स्वप्रतिभया सन्निवेशिता एतादृशी सौन्दर्यचेतना न सर्वत्र सम्भवति। कालिदासकाव्येषु परिदृश्यमानं सौन्दर्यमन्यत्र दुर्लभम्। अतस्तेषां रूपकेषु प्राकृतिकसाधनं प्रचुररूपेण मण्डनाय प्रसाधनाय अलंकरणाय च प्रयुज्यते। कालिदासग्रन्थाना मध्ययनेन ज्ञायते यत् प्रसूनप्रियः कालिदास इति, यदि पुष्पाणां कविः कालिदासः इत्युच्यते तर्हि नातिशयोक्तिर्भवति। कालिदासस्य ग्रन्थेषु यानि श्रृंगारप्रसाधनानि प्राप्यन्ते तानि तरुनिर्मितानि पुष्पनिर्मितान्येव भवन्ति। इह प्रबन्धे तानि प्रसाधनानि गण्यन्ते अथवा प्रस्तूयन्ते यानि महाकविकालिदासेन स्वीयासु कृतिषु वर्णितानि, तत्र प्रथमम्–

वसनानि– श्रृंगारप्रसाधने वस्त्रं प्रथमतया दृश्यते। वस्त्राणि च प्राक्काले वल्कलरूपाणि भवन्ति स्म यानि वृक्षाणामुपरिभोगन (छाल इति) निर्मीयन्ते स्म, तपस्विनामेतानि आभूषणान्यासन्। शकुन्तलापि वल्कलवस्त्राणि धारयन्ती दृश्यन्ते। अपराणि च कपासेन निर्मितानि भवन्ति स्म। अन्यानि च कौशेयवस्त्राणि सन्ति यानि रेशमइति

*सहायक प्राध्यापक, संस्कृत विभाग, डॉ. हरीसिंह गौर विश्वविद्यालय, सागर (म.प्र.)

सूत्रेण निर्मीयन्ते स्म शाकुन्तलस्य चतुर्थेऽङ्के वृक्षाः शकुन्तलायै क्षौमवस्त्राणि प्रददति–

क्षौमं केनचिदिन्दुपाण्डुतरूणा...

एतदतिरिक्तं विक्रमोर्वशीयमिति त्रोटके अभिसारिकारूपे उर्वशी नीलांशुकं धारयति तथा देवीव्रतस्थापनावसरेऽपि सितांशुकं धारयति इति वर्णनं दृश्यते– 'उर्वशी–हला चित्रलेखे! अपि रोचते तेऽयं ममाल्पाभरणभूषितो नीलांशुकपरिग्रहोऽभिसारिकावेषः ।।

वस्त्राणां तावत् चतुर्थः प्रकारः ऊर्णवस्त्राणां दृश्यते। पशूनां केशैनिर्मितानि वस्त्राणि ऊर्णवस्त्राणि उच्यन्ते। राज्ञी धारिणी मालविकायै मालविकाग्निमित्रस्य पंचमांके ऊर्णवस्त्राणि समर्पयति–जयसेने। गच्छ तावत् कौशेयपत्रोर्णयुगलमुपनय।

एवं च साहित्येषु, कालिदासकाव्येषु च, वस्त्रप्रसाधने वस्त्राणां प्रकारचतुः दृश्यते–वल्कलवस्त्रम्, कार्पासवस्त्रम्, कौशेयवस्त्रम्, ऊर्णवस्त्रमिति।

केशपाशः – प्राक्कालादेव केशसंवरणरीतिः अस्माभिरवलोक्यते।

कालिदाससमये वृत्ताकारान् अलकान् (घुघराले) केशान् स्त्रियः कुर्वन्ति स्म, तथा च।

ऋतुसंहारे–

**कर्णेषु योग्यं नवकर्णिकारम्,**
**चलेषु नीलेष्वलकेष्वशोकम्।**
**पुष्पं च फुल्लं नवमल्लिकाया प्रयान्ति**
**कान्तिं प्रमराजनानाम्।।**

अनेनोदारणेन ज्ञायते यत् श्रृंगारप्रसाधने पुष्पैः, रत्नाभूषणैश्च केशन् भूषयन्ति स्म तदा प्रमदाजनाः, वर्षर्तौ पुष्पगुच्छं केशेषु कुर्वन्तिस्म शरदृतौ तावत् अलकान् नवमालतीस्रजा संवृण्वन्ति स्म। शीतर्तौ गुग्गल–धूपेन अलकान् सुवासयन्ति स्म, ऋतुराजसमये खलु पुष्पश्रिया अलंकुर्वन्ति स्म। अर्थात् सौन्दर्यप्रसाधने केशसंवरणं प्रथममेव, तेन वदनं सुशोभितं प्रतीयते अतः नार्यः इदानीमपि नानाप्रकारेण केशसंवरणं कुर्वन्ति। कालिदासनाटकेष्वपि तावन्नार्यः केशावलंकुर्वत्यः दृश्यन्ते।

ऋतुसंहारे वर्णितमस्ति–

**अगरुसुरभिधूपामोदितं केशपाशम्।**
**गलितकुसुममालं कुञ्चिताग्रं वहन्ती।।**

अर्थात् स्त्रियः अगरुधूपेन केशपाशं सुवासयन्तिस्म। विक्रमोर्वशीये एकत्र यूथिकाया (जूही) वर्णनं दृश्यते यया नार्यः स्वकेशपाशं विभूषयन्तिस्म– मदकलयुवतिशशिकला गजयूथपयूथिका धवलकेशी पुरूरवा उर्वशीं यूथिकाधवलकेशी इति नाम्ना कथयति यतोहि उर्वशी केशेषु यूथिकां करोति स्म। कदम्बपुष्पप्रियाः नार्यः इति भारते प्राक् व द्रष्टुं शक्नुमः, विकसति कदम्बपुष्पं वर्षर्तौ। पुष्पाणीमानि मधुर–सुगन्धयुतानि भवन्ति। विक्रमोर्वशीये चतुर्थे अंके कदम्बवृक्षमवलोक्य वदति पुरूरवायत् आरुणिक एष स एव कदम्बः, प्रिया मे येन चूडां श्रृंगारयति।

महाकविकालिदासः पारिजात इव मन्दारवृक्षमपि हैमालयं मन्यते। उर्वशी कदाचित् मन्दारप्रसूनैरपि स्वीयान् केशान् अलंकरोति स्म।

मुखप्रसाधनम्– श्रृंगारप्रियाः कवयः कुरवकवृक्षप्रियाः। मालविकाग्निमित्र–नाटके कुरवककुसुमैः स्त्रियः मुखानि रंजयन्तिस्मेति वर्णनं दृश्यते।

ओष्ठप्रसाधनम् – रक्ताशोकरुचा विशेषितगुणो बिम्बाधरालक्तकः।

मालविकाग्निमित्रस्य एतस्मिन् पद्यांशे उक्तं यत् स्त्रीणाम् ओष्ठप्रसाधन–लालिमात रक्ताशोकलालिमा अतिशयेन आकर्षिका, इति वर्णनेनज्ञा यते यत् तदानीम् नार्यः अधरेषु प्रसाधन

कुर्वन्ति स्म।

ललाटभूषणम्–

मालविकाग्निमित्रे स्त्रीणां ललाटेषु मस्तकेषु तिलकविधानोल्लेखः दृश्यते– आक्रान्ता तिलकक्रिया च तिलकैर्लग्नद्विरेफाञ्जनैः। तिलकमेतत् प्रायः कस्तूरी–कुंकुम–चन्दनादिवस्तूनां भवति स्म यन्ननु अवसरानुकूलं कृत्वा ललाटं भूषयन्ति स्म नार्यः।

पादप्रसाधनम्– कालिदासनाटकेषु लाक्षारसस्योल्लेखः विद्यते यः लाक्षारसः स्त्रियः पादेषु कुर्वन्ति स्म। अभिज्ञानशाकुन्तले श्वसुरालयं प्रति गच्छन्तीं, रूदन्तीं च शकुन्तलां अनुसूया च सान्त्वयति आभरणोचितं रूपमाश्रमसुलभैः प्रसाधनैर्विप्रकार्यते इत्युक्त्वा शकुन्तलां अंलकुरुतस्तदा शकुन्तलायै वृक्षाः नानाप्रसाधनं ददति–

**क्षौमं केनचिदिन्दुपाण्डु तरुणा मांगल्यमाविष्कृतं**
**निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित्**
**अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै**
**र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः।।**

इह लाक्षारसः (अलक्तक–महावर इत्यस्य) उल्लेखः अस्ति यः पादयोः क्रियते स्म। अपि च मालविकाग्निमित्रे–तस्मादेकं ते चरणमुपनय यावत्सालक्तकं... इत्यत्र अलक्तकस्य (महावर–इत्यस्य) वर्णनं दृश्यते।

तनुप्रसाधनम् – विक्रमोर्वशीये पुष्पसरागस्योल्लेखः प्रयोगश्चास्ति पुष्पपरागेण स्त्रियः स्वशरीरं सुवासयिन्त स्म। अद्यत्वे यथा 'पाउडर' चूर्णप्रयोगः भवति तथैवेति। अभिज्ञानशाकुन्तले वर्णनं प्राप्यते यत् कमलपरागेण। सुवासितसलेन स्नानं कृत्वा पूजापाठदिकं भवति स्म।

तोये काञ्चन पद्मरेणुकपिशे धर्माभिषेकक्रिया।

शरीरेषु च प्रायः चन्दनलेपादिकं भवति स्म, चन्दनं हरिचन्दननाम्ना कविरभिहितम्।

भुजप्रसाधनम्– पवित्र दूर्वाङ्कुरला ञ्छितालका... अत्रोल्लेखोऽस्ति यत् स्त्रियस्तदा पवित्रेण दूर्वाङ्कुरेण भुजां भूषयन्ति स्म्।

कालिदासनाटकेषु नानाभूषणानां वर्णनं दृश्यते। कविना आभूषणार्थे आभरण–अलंकार–मण्डन–इत्यादिशब्दानां प्रयोगः कृतः। शकुन्तला उर्वशी मालविका तिस्र एव सुन्दर्यः भिन्ना एव। तासामाभूषणान्यपि भिन्नानि, शकुन्तला तापसकन्या विद्यते तस्या आभूषणं प्राकृतिकं भवति। उर्वशी स्वर्गीया सुन्दरी, तथा मालविका राजसी विद्यते, एतयोराभूषणं कृत्रिमं प्राकृतिकमुभयं विद्यते। तत्र प्राकृतिकमाभूषणं खलु–

अभिज्ञानशाकुन्तले कविः मुख्यतया प्राकृतिकमाभूषणं वर्णयति यतोहि नाटकस्या स्य नायिका तपोवने पालिता पोषिता विद्यते शाकुन्तलातिरिक्तं उभयोरपि नाटकयोः प्राकृतिकमाभूषणोल्लेखः दृश्यते यतोहि प्रकृतिप्रियः कविः।

कर्णाभूषणम्– कालिदासवर्णितेषु पुष्पेषु शिरीषप्रसूनं कोमलं सुरभियुतं च विद्यते अस्य पुष्पमंजर्यः समूहे क्षौमकेशा इव दृश्यन्ते अतः स्त्रियः कोमलस्पर्शेन कर्णयोः धारयन्ति।

मालविकाग्निमित्रनाटके विवरणं प्राप्नोति यत् अशोकशाखासु लम्बमानैः पत्रगुच्छैः नार्यः स्वकर्णौ भूषयन्ति स्म–

मालविका रचितपल्लवावतंसा पादमशोकाय प्रहिणोति

राजा–वयस्य। आदाय कर्णकिसलय... मन्ये।

**ग्रीवाभूषणम् – ग्रीवायां**
**पुष्पाहारधारणरीतिरासींदिति दृश्यते।**
**तथाहि अभिज्ञानशाकुन्तले–**
**यवनीभिःवनपुष्पमालाधारिणीभिः।।**

शाकुन्तले च सेविकानां ग्रीवासु वनपुष्पमाला दर्शिताऽस्ति। अपि च शाकुन्तले एव

इन्द्रदेवः मन्दारपुष्पमालां धारयति इति वर्णितं विद्यते– आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला हरिणा पिनद्धा विक्रमोर्वशीये ऽपि उर्वशी मन्दारमालां धारयन्ती वर्णिताऽस्ति।

मन्दारमालातिरिक्तं उर्वश्याः सौन्दर्याभूषणं वैजयन्तीपुष्पमालाऽपि विद्यते। मालविकाग्निमित्रे मालविका ग्रीवायां मुक्त वाली (मोतियों की माला) हेमसूत्रं च (सोने की चैन) धारयत्युल्लेखः अस्ति। पुरुषा अपि मुक्तावली धारयन्ति स्म। विक्रमोर्वशीये मुक्तावलीं धारयन् नारदः दृश्यते।

वलयाभूषणम्– कमलमिति संस्कृतकवीनां काव्योपकरणामेव। शाकुन्तले कमलनालस्याभूषणस्य वर्णनं प्राप्यते। शकुन्तला मृणालवलयं धारयति इत्युल्लेखः खलु–

स्तनन्यस्तोशीरं शिथिलितमृणालकवलयम्।

कृत्रिमम् आभूषणम्– शिरसि धारणीयेषु आभूषणेषु चूडामणि–रत्नजाल–मुक्ताजाल–किरीट–इत्यादीनि आभूषणानि प्रसिद्धान्यासन्। कालिदासस्य रूपकत्रयेषु कृत्रिमाभूषणस्य विवरणं दृश्यते, तथाहि–

हस्ताभूषणम्–

राजा दुष्यन्तः, चित्ररथश्च भुजायां स्वर्णभुजबन्धं धारयतः स्म अन्यान्यपि रत्नानि धारयतः स्मेति उल्लेखः दृश्यते–

**अनभिलुलितज्याघाताङ्कं मुहुर्मणिबन्धनात्**
**कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते।**

मालविकाग्नित्रिनाटके मालविका हस्ते मणिबन्धं धारयति, धारिणी अपि मणिबन्धेनालंकृता अस्ति।

अंगुलीयकम् – यत्र शाकुन्तले दुष्यन्तनृपः स्वनामाभिधमंगुलीयकं धृत्वा शोभते। तत्र मालविकाग्निमित्रे राज्ञी धारिणी नागमुद्राजटितमंगुलीयकं धारयति।

कटि–आभूषणम्– कटौ हेमकाञ्चीं (करधनी) धारयन्ती इरावती मालविकाग्निमित्रे वर्णिता अस्ति, सा हैमकाञ्ची रशनाइत्यपि अभिधीयते।

पादाभिभूषणम् – नुपूरं स्त्रियः चरणेषु धारयन्ति। मालविकाग्निमित्रे मालविका राजसी कन्या विद्यते सा नुपूरं धारयति।

ललाटाभूषणम्– मालविकाग्निमित्रे राज्ञी धारिणी ललाटे मण्याभूषणं धारितवती अस्ति अद्यत्वे लोके 'मांगटीका' इत्युच्यते।

एवं च वयं द्रष्टुं शक्नुमः यत् महाकविकालिदासः स्वनाटकेषु स्वनायकनायिकाः विभिन्नसाधनैः नामाविधआभूषणैश्च समलंकरोति येन अनुपमसौन्दर्यान्विताः नायक–नायिकाः स्युः पाठकानां च हृदयं समाकृष्येयुरिति शम्।

सन्दर्भ सूची :–


1. अभि. शा. 4.5
2. विक्रमो. पृ.198
3. विक्रमो. पृ.198
4. मा.वि. 5.356
5. ऋतु. 6.5
6. ऋतु. 5.12
7. विक्रमो. 4.46
8. विक्रमो. 4.61
9. मा.वि. 3.5
10. माल. 3.5
11. माल. 3.5
12. अभि. 4.5
13. माल. 3.299
14. अभि.7.12
15. अभि.7.2
16. विक्रमो. 3.12
17. माल.3.16 पृ.307
18. अभि.2, पृ. 27
19. अभि.7.1
20. विक्रमो.1.7
21. अभि.3.6
22. अभि.3.10
23. विक्रमो. 1.15
24. माल. 3.21
25. माल. 3.21